# Vande Bharatavarsham

# वन्दे भारतवर्षम्

## Document Information

Text title : Vande Bharatavarsham

File name : vandebhAratavarSham.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Bharata Rashtra Geetam, Sarvabhaum Sanskrit Prachar Karyalay Pustakamala 38, Vasudev Dvivedi Shastri (Ed.)

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# वन्दे भारतवर्षम्

गायति निरतं निखिलो लोकः प्रीत्या यस्योत्कर्षम् । वन्दे०
प्रालेयाचल-मुकुट - मण्डितं कश्मीराञ्चित - भालम्,
निर्जरतटिनी-मिहिरकन्यका-विलसितचलगलमालम्,
क्षीणकल्मषं विन्ध्यमध्यमं सन्ध्येऽलङ्कुरुतोऽलम्,
रणरणकैर्यच्चरणमर्णवः क्षालयते सुविशालम्,
लोकालोक - प्रहरि - राजितं वैरिभ्यो दुर्द्धर्षम् । वन्दे०
आदिसभ्यतास्त्रोतः सततं सत्याऽहिंसा - युक्तं,
मानवता - निर्मातृ निर्मलं सामगान - संसक्तम्,
भाषा - वर्ण - विचाराणामपि यत्रास्ते वैचित्र्यं,
समता-समरसता - विवेकिता - ख्यातं यत्पावित्र्यम्,
निर्द्वन्द्वं निरामयं निर्भयं विरलं वीतामर्षम् । वन्दे०
नन्दनवननवसुमैः सुरभितं सस्यं यस्य यशस्यं,
विहगानां कलरुतं वसन्ते मदयति मनः प्रशस्यम्,
पूर्वपश्चिमालिङ्गितमुत्तरदक्षिणदेश - नमस्यं,
दशसु दिक्षु भास्वरतररूपं वन्द्यं विश्ववयस्यम्,
स्वर्णसूत्रवद् ग्रथितं भूमौ वितरतु जगते हर्षम् । वन्दे०
वन्दे भारतवर्षम् ।

-श्री शास्त्रिरुद्रदेवत्रिपाठिनाम, “मालवमयूर”

Proofread by Mandar Mali

*Vande Bharatavarsham*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*